International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(6): 13-17
© 2019 IJSR
www.anantaajournal.com
Received: 10-09-2019
Accepted: 12-10-2019

**राजिन्द्रा शर्मा**
शोधनिर्देशिका, संस्कृतविभागः
हि०प्र०वि०वि० शिमला,
हिमाचल प्रदेश, भारत

**सुशील नेगी**
शोधच्छात्रः संस्कृतविभागः
हि०प्र०वि०वि० शिमला,
हिमाचल प्रदेश, भारत

**Corresponding Author:**
**राजिन्द्रा शर्मा**
शोधनिर्देशिका, संस्कृतविभागः
हि०प्र०वि०वि० शिमला,
हिमाचल प्रदेश, भारत

# पालिबौद्धसाहित्ये वर्णितब्रह्मविहारविवेचनम्

**राजिन्द्रा शर्मा, सुशील नेगी**

बौद्धधर्मे दर्शने वा मनसो विशदवर्णनं वर्तते। चित्तमनसी चेति पर्यायशब्दावत्र। तेन मनसश्चित्त- स्य वा शुद्धिकर्म कर्त्तव्यमेतस्माद्धेतोश्चित्तस्य विशददेशना भगवता बुद्धेन भूयोभूयः कृता। भार- तीयप्राच्यविद्यायामपि मनसश्चित्तविषया बारम्बारं प्रोक्ताः ऋषिकविमहात्मादिभिः। तेन यजु- र्वेदे तु तन्मे मनः शिवसङ्कल्पमस्त्विति प्रार्थना परमेश्वरात् कृता। उपनिषत्स्वपि मन एव बन्धन -मोक्षयोः परमकारणत्वेन निरुपितम्- "मन एव कारणं मनुष्याणां बन्धनमोक्षयोः" तेन मनसोचितं कर्म कर्त्तव्यमिति शाक्यमुनिनोद्घोषितम्-

मनो पुब्बङगमा धम्मा मनो सेट्ठा मनोमया।
मनसा चे पदुट्ठेन भासति वा करोति वा।
ततो नं दुक्खमन्वेति चक्कं व वहतो पदम्॥[१]

अत एव मनसश्चित्तस्य वा शुद्धिकर्म विधातव्यमित्येव पातञ्जलयोगदर्शने "परिकर्मत्वेन" निरुपि- तम्। दुःखायते सदा दुर्बलचित्तं यथा दुच्छन्नाच्छदेर्वर्षर्तुजलं स्रवति सततं तथैव मैत्र्यादिभावना- हीनचित्तमपि रागादिभिर्विध्यते-

यथागारं दुच्छन्नं वुट्ठि समतिविज्झति।
एवं अभावितं चित्तं रागो समतिविज्झति॥[२]

तेन मैत्र्यादिभावनोल्लेखो भगवता कृतः। यैश्चित्तं दृढीभवति तेन समाधिसिद्धिरनायासेन भवति।

ताश्च मैत्र्यादिभावना बौद्धपालिसाहित्येषु "ब्रह्मविहार" इत्यभिधेयेन निगदिताः। भगवता पत- ञ्जलिनाऽप्येतासां मैत्र्यादिभावनानां कथनं विहितं। तत्र योगसूत्रं वर्त्तते- "मैत्रीकरुणामुदि- तोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्।[३]
धर्मेऽस्मिन् समस्तमानवाः षड्भागेषु विभक्तास्ते नर- क- तिर्यक्-मनुष्य-राक्षस-महादेवाश्च। तत्र मनुष्य एव महत्त्वात्तेषां कर्त्तव्याकर्त्तव्यचर्चा धर्मे–ऽस्मिन् वर्णिताः। तेन मानवचित्तविशिष्टाध्ययनहेतोर्ब्रह्मविहारा वर्णिताः। ब्रह्मविहारद्वारा सत्त्व- भूतमानवेन चित्तस्थितिकरणाय प्रयासा विधीयन्ते। धर्मोऽसौ व्यक्तिवादी, यत्र व्यक्तेः प्रामुख्येन विवेचनानि लभ्यन्ते। क्षणभङ्गुरलोके व्यक्तिर्दुःखायते, तेन दुःखहानाय बुद्ध-धर्म-सङ्घानां शर- णगमनमेवोचितम्। दुःखकारणत्वेन प्रामुख्येनात्र चैतसिकविकारा वर्णिताः, प्रतीत्यसमुत्पाद- पारमितादीनां ज्ञानेन चैतसिकविकारहानिर्जायते। इतोऽप्यनेके विधयः सन्ति यत्र मैत्र्यादिचतु- र्विधब्रह्मविहारदेशना विशिष्टा। चित्तशुद्धिरेव बुद्धशिक्षा वर्त्तते-

सब्बपापस्स अकरणं कुसलस्स उपसम्पदा।
सचित्तपरियोदपनं एतं बुद्धानं सासनम्॥[४]

यच्चित्तं कामादिभावनाविरतं स एव ऊर्ध्वस्रोतस् इत्युच्यते- "कामेसु च अपटिबद्धचित्तो उद्धं सोतो ति वुच्चति"। पातञ्जलयोगदर्शनेऽप्येतदेव कथनम्। तत्र तु चित्तप्रसादनं परिकर्मातिरिक्तं प्राणानां प्रच्छर्दनविधारणाभ्यामपि भवतीति सिद्धान्तप्रतिष्ठा- "प्रच्छर्दनविधारणाभ्यां वा प्राणस्य"[५] "कोष्ठ्यस्य वायोर्नासिकापुटाभ्यां प्रयत्नविशेषाद्वमनं प्रच्छर्दनम्। विधारणं प्राणायामः"[६] बौद्धमहायानाचार्यदीपङ्करश्रीज्ञानो ब्रूते यन्मैत्रीचित्तेन जन्मादिदुःखमुक्तिविषया- श्चिन्तनीयाः-

दद्यात्सद्रत्नपूर्णानि लोकनाथेभ्य एव हि।
यश्चैकः प्राञ्जलिर्भूत्वा चित्तं बोधाय नामयेत्॥[७]

धर्मेऽस्मिन् विश्वलोकजडाजडमुक्तिप्रार्थना विहिताऽस्ति, तत्र विश्वेषां मुक्त्यै सर्वादौ साधकेन श्रमणेन वा सम्बोधिचित्तोत्पादः कार्यः-

उत्पादयामि सम्बोधौ चित्तं नाथस्य सम्मुखम्।
निमन्त्रये जगत्सर्वं दारिद्र्यान्मोचिताऽस्मि॥[७]

सम्बोधिचित्तविषय आचार्यशान्तिदेवेनापि बोधिचित्तानुसंशयपरिच्छेद उक्तम्-

तस्माच्छुभं दुर्बलमेव नित्यं बलं तु पापस्य महत् सुघोरम्।
तज्जीयतेऽन्येन शुभेन केन सम्बोधिचित्तं यदि नाम न स्यात्॥[९]

**मैत्रीभावना कथं कर्त्तव्येति**: भगवता देशितम्- अहं सुखितो होमि निद्दुक्खो(अहं सुखी भवामि दुःखरहितश्चास्मि) अवेरो अव्यापज्झो अनीघो सुखी अत्तानं परिहसामि (वैरहीनोऽहम्, व्यापादहीनश्च, उपद्रवाभावो मयि, सुखेन परिहरामि) इत्थं भूयोभूय आत्मनि मैत्रीभावना विधातव्या। योगसूत्रस्य व्यासभाष्येऽपि- तत्र सर्वप्राणिषु सुखसम्भोगापन्नेषु मैत्रीं भावयेत्। आध्यात्मिकविशुद्धिमार्गो बौद्धधर्म एवास्ति। धर्मेनानेन व्यक्तिस्तृष्णारहिता भूत्वा लोकेऽस्मिन् शान्तान्मना विचरति। मार्गोऽयं बुद्धत्वप्राप्तिर्निर्वाणप्राप्तिश्चेत्यभिधेयाभ्यां कथ्येते।
पुनश्च मैत्रीभावनया सुखविषया मैत्रीति कथ्यते, तेन सर्वसत्त्वानां सुखित्वमपि कल्प्यते- "सुखिनो वा खेमिनो होन्तु, सब्बे सत्ता भवन्तु सुखितत्ता"। ध्यातव्यं यदत्र बौद्धसाहित्ये सर्व एव सत्त्वा बुद्धस्वरूपा एव सन्ति यथा च प्रतिपादितम्-

सत्त्वा बुद्धा एव किन्त्वागन्तुकमलावृताः।
तस्यापकर्षणात् सत्त्वा बुद्धा एव न संशयः॥[१०]

अनया मैत्रीभावनयाऽऽत्महितवत् परहितेहाऽप्यात्मचित्त उद्भवति तेन यथाऽहं सुखी तथैवा-न्योऽपि सुखी भवेदीदृशी भावनोद्भूतिर्भवति। मैत्रीभावनया क्रोधिनं प्रति क्रोधाऽभावो भवति-

तस्सेव तेन पापियो यो कुद्धं पटिकुज्झति।
कुद्धं अप्पटिकुज्झतो संगामं जेति दुज्जयं॥११

मैत्रीभावनातः स्मृतिमान् भूत्वाऽन्योन्यहितकारिभिक्षुर्भवति-

उभिन्नमत्थं चरति अत्तनो च परस्स च ।
परं संकुपितं ञत्वा यो सतो उपसम्मति॥१२

मैत्रीभावनया रागद्विषोर्हानिर्जायते, द्वेषहीनचित्तं जागृतपुरुषस्य कृते भयकारकं न भवति-

अनवस्सुतचित्तस्स अनन्वाहतचेतसो।
पुञ्ञपापहीणस्स नत्थि जागरतो भयम्॥१३

**करुणाब्रह्मविहारः** व्यासभाष्य उक्तम्- दुःखितेषु करुणाम् (भावयेत्) अर्थात् सर्वदुःखिप्राणिषु करुणाया दयाया वा भावना कर्त्तव्या। पुनश्च भगवता शाक्यमुनिनोक्तम्- करुणया सर्वप्राणिषु प्रेमभावना जागर्ति।

**करुणाभावना कथं कार्या**: कुत्रचिददतिदुःखितम्, निकृष्टमानवम्, विभङ्गाङ्गरहितम्, निर्धनमि- त्यादीन् सम्प्राप्य चेतसि भावयेद् यदेते दुःखहीनाः स्युः, ईदृशी करुणाभावना विधातव्या। वज्र-यानबौद्धसम्प्रदायपरमपावनदलाईलामा अपि सर्वदैवाऽऽत्मवचःसु करुणा भावनाया उपदेशं ददति। करुणेस्त्यस्य कृते आङ्ग्लभाषायाम्- compassion इति शब्दः, तेन वज्रयानबौद्ध-परम्परायामार्यावलोकितेश्वरदेवता करुणामूर्तिरिति तेषां विश्वासः। करुणयैव जगज्जय इति निगदति दलाईलामा सततम्।

**सम्प्रति करुणाऽभावप्रभावः** भारतवर्षे निसर्गेणैव कोमला जनास्तु यतो हि भूमिरिति करुणा- राद्धान्तजनिकेयम् । तेन भारतीयानां कृते नैव करुणापाठपठनाऽऽवश्यकता, तथापि कतिपयजना विस्मृतप्रायाः कदाचिद् भवतीति समस्याकारणम् । परञ्च विश्वस्यान्येषु देशेषु करुणाऽभाव-दुष्प्रभावा दरीदृश्यन्ते। तत्र “ISIS” जनाः करुणाहीनास्तैर्नरसंहारकार्यक्रमश्चालितः, परदेशोपरि प्रसभमेवाक्रमणमित्यादीन्युदाहरणानि दिवानक्तं प्राप्नुमो वयम्। करुणाभावनयाऽहिंसाजागरणं सत्त्वभूतमानवे सम्भूयते। तत्र करुणाभावनया हिंसाविरतो मानवः प्रपद्यते, यथा च भगवतो- क्तम्- कस्यचिदपि हननमस्मिंल्लोके मा स्यादिति- “अन्तानं उपमं कत्वा न हनेय्य न घातये”। वेदघोषोऽपि- “मा हिंस्यात् सर्वभूतानि”इति। करुणाभावना विमुखस्त्वात्म- सुखाय परं हन्ति स मृत्योरनन्तरकालेऽपि न सुखं लभते।

सुखकामानि भूतानि यो दण्डेन विहिंसति।
अत्तनो सुखमेसानो पेच्च सो न लभते सुखं॥१४

**मुदिताभावना**: व्यासभाष्य उक्तम्- पुण्यात्मकेषु मुदिताम् (भावयेत्) अर्थाद्ये प्राणिनः पुण्यरता भवन्ति तान् प्रति मुदिताभावना हर्षभावना वा स्यात्, पापिनः प्रत्युपेक्षाभावना भवेत्।

**मुदिताभावना कथं विधातव्या**: प्रियां व्यक्तिमवलोक्याऽऽत्मचेतसि सत्त्वोऽसावानन्दस्वरूपः, सुखी, प्रमोदश्चेति भावयेत्, अनेन कृत्येन द्रष्टुश्चित्ते मुदिताभावनोद्भावो जायते।

**मुदिताभावनाऽभावप्रभावः** सम्प्रति परं प्रति मुदिताऽभावाद् वयं दरीदृश्यामहे यत् परस्पर- वैरभावना, यतो हि चेदपरव्यक्तिसकाशे सम्पन्नतायाः सर्वाणि वस्तूनि सन्ति तेन द्रष्टाऽसन्तो- षीभूय वैरभावनां तस्मा उद्भावयति, तेन वैरभावनोत्पादनेन समाजे कलहः, देशहानिः, देशस्थ-व्यक्तिचरितहानिश्च जायन्ते। मुदिताभावनायां चित्तप्रसादो भवति, अप्रसन्नचित्तवान् जनो ज्ञानवि- मुख एव तिष्ठति-

अनट्ठितचित्तस्य सद्धम्मं अविजायते।
परिप्लवपसादस्य पञ्ञा न पूरयति॥१५

भावनया अनया ऐहिकपारलौकिकयोर्जीवो हर्षति प्रमोदते च-

इध मोदति पेच्च मोदति कतपुञ्ञो उभयत्थ मोदति।
सो मोदति सो पमोदति दिस्वा कम्मविसुद्धिमत्तनो॥१६

**उपेक्षाब्रह्मविहारः** व्यासभाष्य उक्तम्- अपुण्यशीलेषूपेक्षाम् (भावयेत्) अर्थात् पापिनः प्रति औदासीन्यभावमुत्पादयेत्। पालिसाहित्येषूल्लिखितमस्ति- उपेक्षाभावनया साधकस्तु मैत्र्यादि- भावनास्वभ्यस्तो भवतीति।

**उपेक्षाभावना कथं कर्त्तव्या:** मैत्रीकरुणामुदितादिभिः सूक्ष्मदोषे सत्यपि गुणावक्षेणात् पापिनः प्रति उपेक्षाभावना विधातव्या, अनयोपेक्षाभावनया क्रोधादिसम्भवाऽभावो भवति। उपेक्षाभाव- नया पापिनः प्रति औदासीन्यभावना जागर्ति उक्तं हि-

पापोपि पस्सति भद्रं याव पापं न पच्चति।
यदा च पच्चति पापं अथ पापानि पस्सति॥१७

मानवः सर्वत्रैव पापकर्मलिप्तो भवति नाम्बरे न वारिधौ न पर्वतशृङ्गे नान्यत्र सर्वत्रैव मानवः पापकर्मलिप्तो जायते-

न अन्तलिक्खे न समुदमज्झे न पब्बतानं विवरं पविस्स।
न विज्झति सो जगतिप्पदेस्सो यत्थट्ठितो मुञ्चेय्य पापकम्मा॥१८

उपेक्षाभावनया सर्वे सत्त्वाः समाना इति भावना जागर्ति। तस्याः प्रत्युपस्थानं प्रतिघस्नेहयोः शान्ततैव। उपेक्षाभावनाऽभावप्रभावः- यथा चोक्तं यदुपेक्षाभावनया वैरहानिः स्नेहवृद्धिश्च भवतः, सम्प्रति तु ब्रह्मविहारशिक्षाभावकारणादुपेक्षाभावनापराङ्मुखा जनाः, तेन कथं वैरहानिर्जायेते- ति न जानन्ति। स्नेहवृद्धिकारणात् परस्परद्वेषाभावो भवति। वैरकारणात् सम्प्रति परस्परदेशा आक्रमणायोद्यताः, अमेरिकानार्थकोरियादेशयोर्मध्ये प्राचीनवैरबीजकारणात् सम्प्रति परमाण्वा- द्यस्त्रशक्तिप्रदर्शनं तयोर्देशयोर्निरन्तरं जायमानमस्ति। भारतवर्षस्त्वनादिकालाच्छान्ति- प्रियः, स्नेहकाङ्क्षी, ततोऽनेनैव देशेन विश्वस्य एकनीडत्वमङ्गीकृतम्।

**ब्रह्मविहारप्रयोजनम्:** व्यासभाष्ये ब्रह्मविहारप्रयोजनमुक्तमस्ति- "एवमस्य भावयतः शुक्लो धर्म उपजायते, ततश्च चित्तं प्रसीदति, प्रसन्नमेकाग्रं स्थितिपदं लभते" अर्थाद् ब्रह्मविहाराचारेण शुक्लमयपापरहितचित्तस्योद्भूतिर्भवति। तेन समाधिसिद्धावीश्वरप्राप्तिर्भवति। व्याहारिक रूपे- ऽप्येते चतुर्विधब्रह्मविहारा मनोवैज्ञानिकरूपेणाप्युपेक्षिताः सन्ति। जीवस्य सर्वथा शान्तिर्भूयात्, शान्तचेतसा व्यवहरेत्, तेन सर्वत्र जयं प्राप्नुयात्। अशान्तमनसा पापकर्मवृद्धिर्जायते, पापकर्म वृद्धिना जन्ममरणचक्रसंसृति- र्भवति, येन निर्वाणप्राप्तिरसम्भवाऽशक्या वा। अतो वर्तमानसन्दर्भे विश्वशान्तिश्चेदपेक्षितं तर्हि ब्रह्मविहाराचरणाय प्रयतनीयमस्माभिः।।

**सन्दर्भसङ्केत**


1. धम्मपदम्, यमकवग्गो, श्लोक संख्या-०१,
2. तत्रैव, श्लोकसंख्या-१४
3. पातञ्जलयोगसूत्रम्-१.३३
4. धम्मपदम्, बुद्धवग्गो, श्लोकसंख्या-१८३
5. तत्रैव, १.३४(व्यासभाष्यम्)
6. तत्रैव, (व्यासभाष्यम्)
7. बोधिपथप्रदीपः,१७
8. तत्रैव,२७
9. बोधिचर्यावतारः,१.६
10. हेवज्रतन्त्रम् (भूमिकाभागः)
11. संयुत्तनिकायः,३.१.८
12. तत्रैव, ३.१.४

13. धम्मपदम्, चित्तवग्गो,श्लोकसंख्या-३९
14. धम्मपदम्, दण्डवग्गो, श्लोकसंख्या- १३१
15. धम्मपदम्, चित्तवग्गो, श्लोकसंख्या- ३८
16. धम्मपदम्, यमकवग्गो,श्लोकसंख्या- १६
17. धम्मपदम्, पापवग्गो, श्लोकसंख्या- ११९
18. तत्रैव, श्लोकसंख्या- १२७
19. संयुत्तनिकायः,३.१.८